International Journal of Sanskrit Research 2020; 6(4): 10-13

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(4): 10-13
© 2020 IJSR
www.anantaajournal.com
Received: 10-05-2020
Accepted: 13-06-2020

डॉ. चक्रपाणिपोखेलः
अतिथि–अध्यापकः (संस्कृतविभागः)
ओडिशाकेन्द्रीयविश्वविद्यालयः
कोरापुटम् ओडिशा, भारत ।

Corresponding Author:
डॉ. चक्रपाणिपोखेलः
अतिथि–अध्यापकः (संस्कृतविभागः)
ओडिशाकेन्द्रीयविश्वविद्यालयः
कोरापुटम् ओडिशा, भारत ।

# बौद्धपदार्थसमीक्षा

डॉ० चक्रपाणिपोखेल

## प्रस्तावना

व्याकरणशास्त्रे साध्वसाधुभेदेन शब्दानां द्विधा विभागो वर्तते। येषां शब्दानां शास्त्रानुमोदनपूर्वकं प्रयोगो भवति ते साधुत्वेन ग्राह्याः, तद्भिन्नास्तु असाधुत्वेन। असाधुशब्दानां साक्षाद्वाचकत्वेऽवाचकत्वे वा स्वीकृतेऽपि तत्र लोकव्यवहारे अर्थावबोधाय शब्दः प्रयुज्यते। शब्दो हि येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति सः। अर्थबोधकत्वेनैव शब्दाः प्रातिपदिकत्वेन प्रत्ययोत्पत्त्या च साधुत्वं गच्छन्ति। शब्दस्यार्थेन सह सबन्धसत्वात् शब्दानामर्थवाचकत्वेन अर्थवत्वात् प्रातिपदिकसंज्ञा भवति। अपभ्रंशार्थवाचकानां पदानां तदर्थेन सम्बन्धसत्वात् अपभ्रंशार्थबोधकत्वेन तत्संज्ञाद्वारा भवति साधुत्वम्। परन्तु अत्र शङ्कैषा जागर्तितरामपभ्रंशानां तथा साधितेऽपि तत्र अप्रसिद्धार्थवतां शब्दानामर्थेन सह कथं सम्बन्धो भवति? अर्थेन सह सम्बन्धाभावादेव अर्थवत्वविरहेण पुनस्तत्र "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" [1] इति अर्थवत्वोद्देश्यकप्रातिपदिकसंज्ञा च कथं भवतीति ? तत्र अप्रसिद्धार्थवन्तः शब्दाः यथा–

**एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।**
**कूर्मक्षीरचये स्नातः शशशृङ्गधनुर्धरः।।** [2]

अत्र हि लोकव्यवहारे शास्त्रे वा वन्ध्यासुतपदप्रतिपादितार्थस्य अप्रसिद्धिः, एवमेवाऽन्येषु पदेष्वपि तथैव दृश्यते। एवञ्चात्र साहित्यिकाः प्रसिद्धिविरूद्ध, विद्याविरूद्धश्च द्वौ दोषौ प्रदर्शयन्ति। यथा काव्यप्रकाशे दोषगणनावसरे मम्मटः –

**अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्कमग्राम्याः।**
**सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरूद्धश्च।।** [3]

एवञ्चार्थप्रसिद्धेस्सत्वादेव वन्ध्यासुतादिपदानामर्थैः सह सम्बन्धाभावः सुतरां दृश्यते। तत्राऽन्यापि शङ्का जागर्ति पदपदार्थयोः सम्बन्धः कः इत्याकाङ्क्षायां श्रीभट्टनागेशः पदपदार्थयोः तादात्म्यसम्बन्धोऽस्तीति प्रतिपादयति। तदात्म्यञ्च "तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्" इति सिद्धान्तितम्। एवञ्च विवर्त्तावस्थायां भेदो वास्तविकः, अभेदस्तु बुद्धिपरिकल्पितः, संवर्त्तावस्थायान्तु अभेदो वास्तविकः, भेदस्तु बुद्धिपरिकल्पितो भवतीति भेदसत्वेऽपि अभेदेन प्रतीयमानत्वं सङ्गच्छत इति प्रतिपादितम्। अत्र शङ्कैषा पदस्यार्थेन सह सम्बन्धो वास्तविको बुद्ध्युपारूढो वा,? यतो हि तादात्म्यस्य स्वरूपं प्रतिपाद्य विवर्त्तावस्थायां भेदो वास्तविकोऽभेदोऽवास्तविको बुद्ध्युपारूढः, विवर्त्तावस्थायाञ्च तद्वैपरीत्यं प्रतिपाद्यते।

यथात्र नागेशः- "वस्तुतो बौद्ध एवार्थः शक्यः पदमपि बौद्धं तयोरभेदः" [4] एवञ्च सर्वोऽपि पदपदार्थो बुद्धिपरिकल्पित एव गृह्यत इति बौद्धपदस्य बौद्धपदार्थेन सह सम्बन्धः सोऽपि बौद्ध एव । एवञ्च वन्ध्यासुतस्य समग्रस्य पदस्य पदार्थत्वेन वास्तविके लोकव्यवहारे कस्याप्यर्थस्याप्रसिद्धेः स्थितिसत्वेऽपि बौद्धे तु वन्ध्यायाः प्रसिद्धिः, सुतस्य च प्रसिद्धिरस्तीति तथैव तस्य वन्ध्यासुतपदस्य अर्थवत्वेन प्रातिपदिकसंज्ञा सुबादिव्यवहारश्च भवति। बुद्ध्युपारूढस्य शब्दार्थत्वसमर्थनम् स्वीकृत्यैव तत्र "ध्रुवमपायेऽपादानम्" [5] इति सूत्रस्य "माथुराः पाटलीपुत्रकेभ्य आढ्यतराः" इति प्रयोगे बुद्धिकृतमपादानामादायापादानसंज्ञाया आवश्यकत्वात् बुद्धिकृतावधित्वेनैव कार्यनिर्वाहे अनावश्यकतया भाष्यकारेण खण्डनं विहितम्, इति यथा अवध्यादयः सुबर्थाः बुद्धिकृताः, बुद्ध्युपारूढास्तथैव पदपदार्थादयोऽपि इति भाष्यकृतमपादानसज्ञांविधायकसूत्रखण्डनमपि भवत्यत्र प्रमाणम्।

तत्र बौद्धपदार्थस्वीकारे सति वक्त्रा गौरित्युच्चार्यमाणे श्रोतुः बौद्धे पदार्थे तस्य गोशब्दस्य सम्बन्धः कथं भवतीति शङ्का आपतति। एवञ्च भर्तृहरिः-

**सम्बन्धशब्दे सम्बन्धो योग्यतां प्रति योग्यता।**
**समयाद्योग्यतासंविन्मातापुत्रादियोगवत्।।** [6]

इत्यादिना शब्दार्थयोः योग्यतां सम्बन्धं प्रतिपाद्य पदपदार्थयोः कार्यकारणभावं प्रदर्शयितुं बुद्ध्युपारूढस्य शब्दार्थत्वं प्रदर्शयन् प्रतिपादयति यथा-

**शब्दः कारणमर्थस्य स हि तेनोपजन्यते।**
**तथा च बुद्धिविषयादर्थाच्छब्दः प्रतीयते।।** [7]

अस्याः कारिकायास्त्वयमर्थो यथा - तत्र हि वक्तृबुद्धिस्थः शब्दः संकल्पात्मकत्वेनावस्थितः श्रोतृबुद्धिस्थस्यार्थस्य वक्त्रा वाचकत्वाभिप्रायेण स्थानकरणव्यापारैरभिव्यञ्जितः श्रोतृविषयमनुप्राप्तस्सन् कारणं भवति। यतो हि श्रोतृबुद्धिस्थस्यार्थस्योद्बोधकत्वं वक्तृप्रयुक्ते शब्दे आयातीति जनकत्वं तस्य सिद्ध्यति। एवञ्च वक्त्रा स्थानकरणव्यापारैरभिव्यञ्जितो विषयत्वेन श्रोतृश्रुतिमापन्नः, अर्थेन सह सामानाधिकरण्यं भजत इति कार्यरूपस्यार्थप्रतीतेः कारणरूपस्य च शब्दस्य सामानाधिकरण्यं भवतीति कार्यकारणभाव उपपद्यते। अस्मिन् विषये ब्रह्मकाण्डे भर्तृहरिर्यथा-

**आत्मभेदस्तयोः केचिदस्तीत्याहुः पुराणगाः।**
**बुद्धिभेदादभिन्नस्य भेदमेके प्रचक्षते।।** [8]

तत्रैव स्वोपज्ञवृत्तिकारेण समुपस्थापितः श्लोको यथा-

**अविभक्तो विभक्तेभ्यो जायतेऽर्थस्य वाचकः।**
**शब्दस्तत्रार्थरूपात्मा सम्भेदमुपगच्छति।।** [9]

वक्तृबुद्धिस्थः शब्दोऽर्थप्रत्यायने कथं कारणं भवतीति हरिणेत्थं प्रतिपादितम्। यथा-

**अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम्।**
**तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक्।।** [10]

अम्बाकर्त्रीकारेण विषयोऽयं श्लोकेनानेन स्पष्टीकृतस्तदुक्तं भामत्यामित्यादिना यथा-

**कार्यात्मना तु नानात्वमभेदः कारणात्मना।**
**हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा।।** [11]

अथ च शब्दस्य बुद्धिस्थत्वं निमित्तप्रत्यायकयोः शब्दार्थयोः कथं सिद्ध्यतीत्याशङ्क्य समाधत्ते-

**वितर्कितः पुरा बुद्ध्या क्वचिदर्थे निवेशितः।**
**करणेभ्यो विवृत्तेन ध्वनिना सोऽनुगृह्यते।।** [12]

इत्थं शब्दार्थयोः कार्यकारणभावः समवस्थितः। एवञ्चोच्चारणात्प्रागपि वक्तृबुद्धावेव शब्दस्य, अर्थस्य च सामानाधिकरण्यं भवति। उच्चारिते सत्यपि श्रोतृश्रुतिद्वारा श्रोतृबुद्धौ शब्दार्थस्य च सामानाधिकरण्यं भवति। अत्र अम्बाकर्त्रीकारो यथा- "अयमर्थः हि यतः सः= अर्थः तेन = शब्देनोपजन्यत इति । तथा च पूर्वोक्तप्रकारेण च शब्दोऽर्थस्य कारणम्। चकारादन्यथा च, अर्थः शब्दस्य कारणम्। तथा हि बुद्धिविषयात् - संकल्पात्मना वक्तृबुद्धिस्थादर्थात् कारणभूतात्, वक्त्रा स्थानकरणैरभिव्यञ्जितः शब्दः श्रोतृश्रुतिविषयमनुप्राप्तः श्रोत्रा प्रतीयत इति रीत्या अर्थोऽपि वक्तृबुद्धिस्थः शब्दस्य श्रोतृबुद्धिस्थस्य कारणम्। प्रागुक्तरीत्या सामानाधिकरण्यसम्भवात्। एवं शब्दार्थयोः द्वयोरपि परस्परं प्रति कार्यत्वं कारणत्वञ्च सिद्ध्यति" [13] इति।।

एवं रीत्या बुद्धिस्थ एव शब्दः बुद्धिस्थस्यार्थस्य कारणम्, बुद्धिस्थ एवार्थो बुद्धिस्थस्य शब्दस्य कारणमिति परस्परं तयोस्सामानाधिकरण्यं कार्यकारणभावश्च सिद्ध्यति। एवञ्च बाह्यार्थतादात्म्येनावसीयमानोऽध्यस्यमानो वाऽर्थोऽपि बौद्ध एवार्थः। स च शब्दार्थो न तु बाह्यार्थ एव शब्दार्थ इति बाह्यार्थस्य पदार्थत्वेन स्वीकारादेव तत्र वन्ध्यासुतादौ बाह्यार्थेन सम्बन्धाभावेऽपि नार्थवत्वविरह

इति प्रातिपदिकत्वं वन्ध्यासुतादीनां भवत्येव। एवमेव शब्दोच्चारणपूर्वमेव वक्तृबुद्धौ शब्दस्य योऽर्थो विवक्षितस्तस्य बलात् स्थानकरणाद्यभिघातेन जायमानः शब्दः स्वोपादानकार्थस्य प्रकाशको विद्युदादिप्रकाशवद् विजातीयवेगप्रचयधर्मा श्रोतृश्रुतिदेशमुपागतः श्रोतृबुद्धिस्थमर्थं प्रकाशयतीति शब्दोऽर्थस्य, अर्थोऽपि शब्दस्य कारणम्। एवञ्च शब्दार्थयोरुभयोरपि परस्परं कार्यत्वं कारणत्वञ्च वर्णितं भवतीति धूमाग्न्योः कार्यकारणभावतो वैलक्षण्येन शब्दार्थयोरभेदेन तादात्म्याध्यासलक्षणः सम्बन्धः समवस्थितो भवति।

एतावता कथं बुद्धिस्थोऽर्थः बुद्धिस्थस्य शब्दस्य, तद्वैपरीत्येन च शब्दोऽर्थस्य कारणं भवतीति प्रदर्शितम्। प्रदर्शनेनानेन च पूर्वमुपस्थापितानां वन्ध्यासुतादौ प्रातिपदिकत्वाभावादिदोषाणां निराकरणञ्च सुतरां जायते।

तत्र वक्तृविवक्षानुसारमेव अर्थबोधः कथं भवतीति प्रश्ने तु वक्तुमिदं शक्यते यत् विवक्षातः पूर्वमप्यर्थज्ञानस्य स्थितिर्दृश्यते। तथा च वक्त्रा यदा शब्दः प्रयुज्यते तदा सः शब्दोऽर्थसम्मिश्र एव भवति, तथा च वक्त्रभिप्रायेण स्थानकरणाद्यभिघातेन च जायमानः शब्दोऽपि निश्चितार्थसम्मिश्रो भवतीति श्रोतुविषयमापन्नः शब्दो निश्चितार्थसम्मिश्रस्सन् वक्त्रभिप्रायेणैवार्थमवगमयति।

एवञ्च श्रोतुः बुद्धौ यादृशी आर्थीवासना वर्तते तादृशीं परिकल्प्यैव वक्त्रा स्वाभिप्रेतार्थसम्मिश्रः शब्दः प्रयुज्यते। अर्थमजानन्तं शब्दोपदेशस्यानौचित्यात्। एवञ्च "गामानय" इत्यादौ तत्तच्छब्दतत्तदर्थवासनाशून्यानान्तु न तत्तच्छब्दात् तदर्थस्य ज्ञानं भवति। अतो गोशब्दस्य गवार्थवासना यस्मिन् श्रोतरि, तस्यैव गवानयने प्रवृत्तिः। एकभाषाविदामन्यतो बोधो भवति न वेति नाशङ्कनीयम्। तत्र संस्कृतशब्दस्तदर्थवासनायुक्तस्य संस्कृतशब्दश्रवण एव तदर्थप्रवृत्तिरन्यशब्दश्रवणे नैव भवति। यतो हि बुद्धिस्थत्वेन भाषान्तरीयेण शब्देनापि सामानाधिकरण्यं संस्कृतशब्दार्थस्य भवति, तथापि कार्यकारणभावस्तयोर्न स्वीक्रियते। यतः तदर्थस्य बोधे तत्पदस्य स्वरतो वर्णतो वा आनुपूर्वीकत्वं गृह्यते। तदुक्तं महाभाष्ये

**दुष्टः शब्दः स्वरतो वर्णतो वा मीथ्याप्रयुक्तो न तमर्थमाह।।**
**स वाग्व्रजो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्।।** [14]

एवञ्च विविधार्थवाचकानां शब्दानाम्, विविधानामर्थानाञ्च बौद्धपदार्थत्वेन सामानाधिकरण्ये सत्वेऽपि कार्यकारणभावस्तु नैव सिद्ध्यतीति तादात्म्याध्यासस्य सत्वादेव अन्येन पदेन नान्यार्थस्य बोध इत्यवधेयम्। अथवा अश्वास्वयोः शब्दयोः प्रयोगेऽपि श्रोतृश्रुतिविषयमापन्नयोस्तयोः तुरगेण निर्धनेन चार्थेन सामानाधिकरण्यं भवति, तथापि अश्वपदेन तुरगार्थबोधो भवति, अस्वपदेन निर्धनार्थबोधो भवतीति वासनायुक्तं श्रोतारं प्रत्येव स्थानकरणाद्यभिघातपूर्वं वक्त्रा उपदिष्टेनाश्वेन तुरगस्यैव बोधः, अस्वेन च निर्धनस्यैव बोधो भवति। एवञ्च स्वरविपर्यये स्वरविपर्यतो वक्तुः विवक्षितार्थ एवानुसन्धेय इति "स्थूलपृषती" इत्यादौ स्वरभेदेऽर्थभेद इत्यवधेयम्।

नानार्थस्थले शेषस्थले यत्र एकस्यैव शब्दस्यैकाधिकोऽर्थो विवक्षितस्तत्र तु अर्थान्तरस्यापि बौद्धपदार्थत्वेन अभिधयैव बोधः, अर्थभेदेन शक्तिभेदस्य सर्वैस्स्वीकृतत्वात्। अत्रेयं शङ्का एकस्य एकस्मिन् वृत्तिद्वयकल्पने वृत्तिद्वयविरोधस्स्यादिति? अत्रोच्यते बोधद्वयस्य क्रमपूर्वकत्वान्न दोषः।

इत्थमेतावता शब्दस्यार्थस्य बौद्धत्वं स्वीकृतम्। शब्दार्थस्य बुद्ध्युपारूढत्वे स्वीकृते वार्त्तमानिक्यां "ओदनं भुङ्क्ते" इत्यादौ क्रियायाः पूर्वं बुद्धिस्थत्वाभावात् कथं बौद्धव्यवहारः? ओदनभोजनरूपस्यार्थस्य तदानीमेव जायमानस्य पूर्वकालावच्छेदेन बुद्धौ स्थित्यभावात् इति। इमामेव शङ्कां निरस्यति भर्तृहरिर्यथा–

**भोजनाद्यपि मन्यन्ते बुद्ध्यर्थे यदसम्भवि।**
**बुद्ध्यर्थादेव बुद्ध्यर्थे जाते तदपि दृश्यते।।** [15]

एवञ्च भोजनम्, भोक्ता तयोस्सम्बन्धश्च पूर्वं प्रतिपादितक्रमेण बुद्धौ न सन्तीति बुद्धिस्थत्वाभावेन न कार्यकारणता इति बौद्धार्थे स्वीक्रियमाणे "ओदनं भुङ्क्ते" इत्यादौ बोधाभाव इति वक्तुं नैव शक्यते। यतो हि ओदनं भुङ्क्त इत्यत्र भोजनस्य तात्कालिकत्वेऽपि अपरस्मिन् भोक्तरि वक्त्रा यद् ओदनभोजनं दृश्यते, तद्बुद्धिस्थत्वेन तत्साजात्यादेव प्रकृतौदनभोजनेऽपि अर्थसम्मिश्रो जायते। अत एवोक्तम् "बुद्ध्यर्थादेव बुद्ध्यर्थे जाते तदपि दृश्यते" इति। अयं पक्षः क्षणिकविज्ञानवादिमतमाश्रित्य प्रस्तुतः। क्षणिकवादिनये क्रियाकारके द्वेऽपि बुद्धिविपरिवर्तिनी स्त इति तन्नये क्रियाकारकयोः प्रतिभासमात्रशरीरत्वात्। एवञ्च बौद्धेन सामानाधिकरण्येन तयोः परस्परं साध्यसाधनभावः सिद्धो भवति। बुद्ध्यर्थादिति पदस्यौदनादि प्रतिभासाद्, इत्यर्थे कृते प्रकृतौदनभोजनकर्तुरन्यस्मिन् ओदनभोजनकर्तुरन्यस्मिन् देशे वा भुज्यमानादेव ओदनभोजनस्य बुद्ध्यर्थत्वं स्वीकृत्य बौद्धपदार्थसम्मिश्रतया स्थानकरणाद्यभिघातेन जायमानः शब्दः श्रोतृश्रुतिविषयतामाप्नोति, इति श्रोत्रापि अन्यस्मिन् भोजनकर्तरि भुज्यमानाद् ओदनं भुङ्क्त इत्यस्यार्थः बुद्धिस्थकृतो वर्तत इति। सामानाधिकरण्यं सम्भवत्येव। एतत्सर्वं माध्यमिकविज्ञानवादाश्रयणेन प्रतिपादितम्, न तु विज्ञानवादो माध्यमिकानां सिद्धान्त इति तत्रैव वाक्यपदीयस्य हेलाराजीये प्रतिपादितं दृश्यते। तत्र बाह्यार्थवादिनये सौत्रान्तिकवैभाषिकादिनयेऽपि बुद्धिपरिवर्तिनः शब्दार्थस्य

प्रतीतेः स्वीकारो दृश्यते। एवञ्च बाह्यार्थबौद्धार्थयोरभेदाध्यवसायात् नाम तादात्म्यध्यासात् "ओदनं भुङ्क्ते" इत्यादौ क्रियाकारकभावेन बहिर्व्यवहारसिद्धिर्भवत्येव। तथोक्तं हेलाराजीये " तथा हि बाह्यार्थे सति दर्शनम्। दर्शनेऽर्थनिर्यासः, तस्मिन् सति वक्तुमीहा, ततः प्रयत्नादेः शब्दोच्चारणमिति परम्परया बाह्यार्थ एव वाच्य इति" [16] इति।

एवंप्रकारेण बाह्यार्थवादिनयेऽपि परम्परया बौद्धार्थसमर्थनमेव कर्तव्यं भवतीति सर्वत्र बौद्धार्थाश्रयणीयमेव विधीयतामिति भर्तृहरेराशयो दृश्यते। बौद्धार्थस्य च पदार्थत्वेन स्वीकृते सति "एष वन्ध्यासुतो याति" इत्यादौ योग्यताभिधेयेन सम्बन्धेन अर्थप्रत्यायनमपि सम्भवि। बाह्यपदार्थस्य क्षीयमाणत्वेन असंगतमिव दृष्टम् "सिद्धे शब्दार्थसम्बन्धे" [17] इति भाष्यवार्तिकमपि संगच्छते बौद्धपदार्थस्य नित्यत्वात् शब्दार्थयोस्सम्बन्धोऽपि नित्य इति सुधियो विभावयन्तु। इति।

### संदर्भ सूची


1. पा.सू. १/२/४५
2. परमलघुमञ्जूषाशक्तिनिरूपणम्
3. काव्यप्रकाशः ७/ ५५-५७
4. वैयाकरणसिद्धान्तलघुमञ्जूषा कलाकुञ्जिकाटीकोपेता पृ.सं. ४५ चौ. ख.सि. वाराणसी।
5. पा.सू. १/४/२४
6. वाक्यपदीयम् पदकाण्डम् सम्बन्धसमुद्देशः कारिका सं. ३१ सं.सं.वि. वि प्रकाशन वाराणसी।
7. वाक्यपदीयम् पदकाण्डम् सम्बन्धसमुद्देशः कारिका सं. ३२ सं.सं.वि. वि प्रकाशन वाराणसी।
8. वाक्यपदीयम् ब्रह्मकाण्डम् कारिका सं. ४५ सं.सं.वि.वि प्रकाशन वाराणसी।
9. वाक्यपदीयम् ब्रह्मकाण्डम् स्वोपज्ञवृत्ति कारिका सं. ४४ पृ.स.९० सं. सं.वि.वि प्रकाशन वाराणसी।
10. वाक्यपदीयम् ब्रह्मकाण्डम् कारिका सं. ४६ सं.सं.वि.वि प्रकाशन वाराणसी।
11. वाक्यपदीयम् ब्रह्मकाण्डम् अम्बाकर्त्रीटीका पृ. सं. ९३ कारिका सं. ४६ सं.सं.वि.वि प्रकाशन वाराणसी।
12. वाक्यपदीयम् ब्रह्मकाण्डम् कारिका सं. ४७ सं.सं.वि.वि प्रकाशन वाराणसी।
13. अम्बाकर्त्रीटीका वाक्यपदीयम् पदकाण्डम् सम्बन्धसमुद्देशः पृ.सं.२८० कारिका सं. ३२ सं.सं.वि.वि प्रकाशन वाराणसी।
14. व्याकरणमहाभाष्यम् पश्पशाह्निकम् आनुषङ्गिकप्रयोजननिरूपणप्रकरणम्।
15. वाक्यपदीयम् पदकाण्डम् सम्बन्धसमुद्देशः कारिका सं. ३३ सं.सं.वि. वि प्रकाशन वाराणसी।
16. वाक्यपदीयम् पदकाण्डम् सम्बन्धसमुद्देशः प्रकाशव्याख्या पृ.सं. २८३ कारिका सं. ३३ सं.सं.वि.वि प्रकाशन वाराणसी।
17. प्रदीपोद्योतम् व्याकरणमहाभाष्यम् पश्पशाह्निकम् प्रथमवार्तिकम् पृ.सं. ५९ चौ.सं.प्र वाराणसी।